# shrIrAmajAnakIstutiH

# શ્રીરામજાનકીસ્તુતિઃ

## Document Information

Text title : rAmajAnakIstutiH

File name : rAmajAnakIstutiH.itx

Category : raama, devii, sItA, rAmAnujasampradAya, devI

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરામજાનકીસ્તુતિઃ

ધ્યેયં સદા પરિભવઘ્નમભીષ્ટદોહં,
તીર્થાસ્પદં શિવવિરિઞ્ચિનુતં શરણ્યમ્ ।
ભૃત્યાર્તિહં પ્રણતપાલભવાબ્ધિપોતં,
વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૧॥

ત્યક્ત્વા સુદુસ્ત્યજસુરેપ્સિતરાજ્યલક્ષ્મીં
ધર્મિષ્ઠ આર્યવચસા યદગાદરણ્યમ્ ।
માયામૃગં દયિતયેપ્સિતમન્વધાવત્
વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૨॥

વેદાન્તવેદ્યમતિગુહ્યમનન્તમાદ્યં,
તાપત્રયાનલનિવારણમાદિમૂલમ્ ।
વૃન્દાવનસ્થલવિહારવિનોદલીલં,
વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥ ૩॥

ત્વમેવ માતા ચ પિતા ત્વમેવ,
ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ,
ત્વમેવ સર્વં મમ દેવદેવ ॥ ૪॥

શ્રીરાઘવં દશરથાત્મજમપ્રમેયં,
સીતાપતિં રઘુકુલાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં,
રામં નિશાચરવિનાશકરં નમામિ ॥ ૫॥

વન્દે વિદેહતનયાપદપુણ્ડરીકં,
યઃ સૌરવૃષમાહિતયોગચિત્તમ્ ।
હન્તું ત્રિતાપમનિશં મુનિહંસસેવ્યં,
સન્માનશીલપરિપીતપરાગપુઞ્જમ્ ॥ ૬॥

ઉલ્લઙ્ઘ્ય સિન્ધોસ્સલિલં સલીલં
યઃ શોક વહ્નિં જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં
નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ૭॥

મનોજવં મારુતતુલ્યવેગં
જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં
શ્રીરામદૂતં શરણં પ્રપદ્યે ॥ ૮॥

યત્ર યત્ર રઘુનાથકીર્તનં
તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
વાષ્પવારિપરિપૂર્ણલોચનં
મારુતિં નમત રાક્ષસાન્તકમ્ ॥ ૯॥

પ્રથમો અનન્તરૂપશ્ચ દ્વિતીયો લક્ષ્મણસ્તથા ।
તૃતીયો બલરામશ્ચ કલૌ રામાનુજો મુનિઃ ॥ ૧૦॥

સંસારતાપસન્દગ્ધશીલહેતુવિવર્ણિતઃ ।
રામદેશિકપદામ્ભોજછાયાવિશ્રામમાશ્રયેત્ ॥ ૧૧॥

જય જય યતિરાજ ફણિરાજ અવતારમણે ।
પ્રબલપાખણ્ડમાનો વિજયી ભવ વિજયી ભવ ॥ ૧૨॥

ઇતિ શ્રીરામજાનકીસ્તુતિઃ સમાપ્તા ॥

Proofread by PSA Easwaran

---

*shrIrAmajAnakIstutiH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*